শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ সপ্তমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ সপ্তমঃ সর্গঃ ॥

## রাৱণভৱনস্য পুষ্পকৱিমানস্য চ ৱর্ণনম্

স ৱেশ্মজালং বলৱান্ দদর্শ
    ৱ্যাসক্তৱৈদূর্যসুৱর্ণজালম্।
যথা মহৎপ্রাৱৃষি মেঘজালং
    ৱিদ্যুৎপিনদ্ধং সৱিহঙ্গজালম্॥ **5.7.1** ॥

নিৱেশনানাং ৱিৱিধাশ্চ শালাঃ
    প্রধানশঙ্খাযুধচাপশালাঃ।
মনোহরাশ্চাপি পুনর্ৱিশালা
    দদর্শ ৱেশ্মাদ্রিষু চন্দ্রশালাঃ॥ **5.7.2** ॥

গৃহাণি নানাৱসুরাজিতানি
    দেৱাসুরৈশ্চাপি সুপূজিতানি।
সর্ৱৈশ্চ দোষৈঃ পরিৱর্জিতানি
    কপির্দদর্শ স্ৱবলার্জিতানি॥ **5.7.3** ॥

তানি প্রযত্নাভিসমাহিতানি
    মযেন সাক্ষাদিৱ নির্মিতানি।
মহীতলে সর্ৱগুণোত্তরাণি
    দদর্শ লঙ্কাধিপতের্গৃহাণি॥ **5.7.4** ॥

ততো দদর্শোচ্ছ্রিতমেঘরূপং
    মনোহরং কাঞ্চনচারুরূপম্।

রক্ষোঽধিপস্যাত্মবলানুরূপং
গৃহোত্তমং হ্যপ্রতিরূপরূপম্॥ **5.7.5** ॥

মহীতলে স্বৰ্গমিৱ প্ৰকীৰ্ণং
শ্রিযা জ্ৱলন্তং বহুরত্নকীর্ণম্।
নানাতরূণাং কুসুমাৱকীর্ণং
গিরেরিৱাগ্রং রজসাৱকীর্ণম্॥ **5.7.6** ॥

নারীপ্রৱেকৈরিৱ দীপ্যমানং
তডিদ্ভিরম্ভোধরমর্চ্যমানম্।
হংসপ্রৱেকৈরিৱ ৱাহ্যমানং
শ্রিযা যুতং খে সুকৃতং ৱিমানম্॥ **5.7.7** ॥

যথা নগাগ্রং বহুধাতুচিত্রং
যথা নভশ্চ গ্রহচন্দ্রচিত্রম্।
দদর্শ যুক্তীকৃতচারুমেঘ -
চিত্রং ৱিমানং বহুরত্নচিত্রম্॥ **5.7.8** ॥

মহী কৃতা পৰ্ৱতরাজিপূর্ণা
শৈলাঃ কৃতা ৱৃক্ষৱিতানপূর্ণাঃ।
ৱৃক্ষাঃ কৃতাঃ পুষ্পৱিতানপূর্ণাঃ
পুষ্পং কৃতং কেসরপত্রপূর্ণম্॥ **5.7.9** ॥

কৃতানি ৱেশ্মানি চ পাণ্ডুরাণি
তথা সুপুষ্পাণ্যপি পুষ্করাণি।
পুনশ্চ পদ্মানি সকেসরাণি
ৱনানি চিত্রাণি সরোৱরাণি॥ **5.7.10** ॥

পুষ্পাহ্ৱযং নাম ৱিরাজমানং
রত্নপ্রভাভিশ্চ ৱিঘূর্ণমানম্।

ৱেশ্মোত্তমানামপি চোচ্চমানং
মহাকপিস্তত্র মহাৱিমানম্॥ **5.7.11** ॥

কৃতাশ্চ ৱৈদূর্যমযা ৱিহঙ্গা
রূপ্যপ্রৱালৈশ্চ তথা ৱিহঙ্গাঃ।
চিত্রাশ্চ নানাৱসুভির্ভুজঙ্গা
জাত্যানুরূপাস্তুরগাঃ শুভাঙ্গাঃ॥ **5.7.12** ॥

প্রৱালজাম্বূনদপুষ্পপক্ষাঃ
সলীলমাৱর্জিতজিহ্মপক্ষাঃ।
কামস্য সাক্ষাদিৱ ভান্তি পক্ষাঃ
কৃতা ৱিহঙ্গাঃ সুমুখাঃ সুপক্ষাঃ॥ **5.7.13** ॥

নিযুজ্যমানাশ্চ গজাঃ সুহস্তাঃ
সকেসরাশ্চোৎপলপত্রহস্তাঃ।
বভূৱ দেৱী চ কৃতাসুহস্তা
লক্ষ্মীস্তথা পদ্মিনি পদ্মহস্তা॥ **5.7.14** ॥

ইতীৱ তদ্ গৃহমভিগম্য শোভনং
সৱিস্মযো নগমিৱ চারুকন্দরম্।
পুনশ্চ তৎপরমসুগন্ধিসুন্দরং
হিমাত্যযে নগমিৱ চারুকন্দরম্॥ **5.7.15** ॥

ততঃ স তাং কপিরভিপত্য পূজিতাং
চরন্ পুরীং দশমুখবাহুপালিতাম্।
অদৃশ্য তাং জনকসুতাং সুপূজিতাং
সুদুঃখিতাং পতিগুণৱেগনির্জিতাম্॥ **5.7.16** ॥

ততস্তদা বহুৱিধভাৱিতাত্মনঃ
কৃতাত্মনো জনকসুতাং সুৱর্ত্মনঃ।

অপশ্যতোঽভৱদতিদুঃখিতং মনঃ
সচক্ষুষঃ প্রৱিচরতো মহাত্মনঃ ॥ **5.7.17** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে সপ্তমঃ সর্গঃ ॥